# Indira Ashtottarashatanama Stotram

# इन्दिराष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Indira Ashtottarashatanama Stotram

File name : indirAShTottarashatanAmastotram.itx

Category : devii, aShTottarashatanAma, devI

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran, D K M Kartha

Description/comments : See corresponding Namavali

Latest update : June 28, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# इन्दिराष्टोत्तरशतनामस्तोत्रम्

इन्दिरा विष्णुहृदयमन्दिरा पद्मसुन्दरा ।
नन्दिताखिलभक्तश्रीनन्दिकेश्वरवन्दिता ॥ १॥

केशवप्रियचारित्रा केवलानन्दरूपिणी ।
केयूरहारमञ्जीरा केतकीपुष्पधारणी ॥ २॥

कारुण्यकवितापाङ्गी कामितार्थप्रदायनी ।
कामधुक्सदृशा शक्तिः कालकर्मविधायिनी ॥ ३॥

जितदारिद्र्यसन्दोहा धृतपङ्केरुहद्वयी ।
कृतविद्ध्यण्डसंरक्षा नतापत्परिहारिणी ॥ ४॥

नीलाभ्राङ्गसरोनेत्रा नीलोत्पलसुचन्द्रिका ।
नीलकण्ठमुखाराध्या नीलाम्बरमुखस्तुता ॥ ५॥

सर्ववेदान्तसन्दोहशुक्तिमुक्ताफलायिता ।
समुद्रतनया सर्वसुरकान्तोपसेविता ॥ ६॥

भार्गवी भानुमत्यादिभाविता भार्गवात्मजा ।
भास्वत्कनकताटङ्का भानुकोट्यधिकप्रभा ॥ ७॥

पद्मसद्मपवित्राङ्गी पद्मास्या च परात्परा ।
पद्मनाभप्रियसती पद्मभूस्तन्यदायिनी ॥ ८॥

भक्तदारिद्र्यशमनी मुक्तिसाधकदायिनी ।
भुक्तिभोग्यप्रदा भव्यशक्तिमदीश्वरी ॥ ९॥

जन्ममृत्युज्वरत्रस्तजनजीवातुलोचना ।
जगन्माता जयकरी जयशीला सुखप्रदा ॥ १०॥

चारुसौभाग्यसद्विद्या चामरद्वयशोभिता ।
चामीकरप्रभा सर्वचातुर्यफलरूपिणी ॥ ११॥

राजीवनयना रम्या रामणीयकजन्मभूः ।
राजराजार्चितपदा राजमुद्रास्वरूपिणी ॥ १२॥

तारुण्यवनसारङ्गी तापसार्चितपादुका ।
तात्त्विकी तारकेशार्कताटङ्कद्वयमण्डिता ॥ १३॥

भव्यविश्राणनोद्युक्ता सव्यक्तसुखविग्रहा ।
दिव्यवैभवसम्पूर्णा नव्यभक्तिशुभोदया ॥ १४॥

तरुणादित्यताम्रश्रीः करुणारसवाहिनी ।
शरणागतसन्त्राणचरणा करुणेक्षणा ॥ १५॥

वित्तदारिद्र्यशमनी वित्तक्लेशनिवारिणी ।
मत्तहंसगतिस्सर्वसत्तासामान्यरूपिणी ॥ १६॥

वाल्मीकिव्यासदुर्वासो वालखिल्यादिवाञ्छिता ।
वारिजेषणहृत्केकिवारिदायितविग्रहा ॥ १७॥

दृष्ट्याऽऽसादितविद्ध्यण्डा सृष्ट्यादिमहिमोच्छ्रया ।
आस्तिक्यपुष्पभृङ्गी च नास्तिकोन्मूलनक्षमा ॥ १८॥

कृतसद्भक्तिसन्तोषा कृत्तदुर्जनपौरुषा ।
सञ्जीविताशेषभाषा सर्वाकर्षमतिस्नुषा ॥ १९॥

नित्या शुद्धा परा बुद्धा सत्या संविदनामया ।
विजया विष्णुरमणी विमला विजयप्रदा ॥ २०॥

श्रीङ्कारकामदोग्धी च ह्रीङ्कारतरुकोकिला ।
ऐङ्कारपद्मलोलम्बा क्लीङ्कारामृतनिम्नगा ॥ २१॥

तपनीयाभसुतनुः कमनीयस्मितानना ।
गणनीयगुणग्रामा शयनीयोरगेश्वरा ॥ २२॥

रमणीयसुवेषाढ्या करणीयक्रियेश्वरी ।
स्मरणीयचरित्रा च तरुणी यज्ञारूपिणी ॥ २३॥

श्रीवृक्षवासिनी योगिधीवृत्तिपरिभाविता ।
प्रावृङ्गार्गववाराच्र्या संवृतामरभामिनी ॥ २४॥

तनुमध्या भगवतीमनुजापिवरप्रदा ।
लक्ष्मी विल्वाश्रिता पातु सोऽष्टोत्तरशतस्तुता ॥ २५॥

इति इन्दिराष्टोत्तरशतनामस्तोत्रं समाप्तम् ।

Encoded and proofread by PSA Easwaran

*Indira Ashtottarashatanama Stotram*
pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*